विप्पिअ०— हे आर्ये, हे सखि, विप्रियकारको अप्रियकारको यद्यपि प्रियः ततोऽपि तं आनय । अग्निना दग्धं यद्यपि गृहं ततोऽपि तेनाग्निना सह कार्यं भवेत् ॥ २०

जिम्व जि०— यथा यथा श्यामला[17] स्त्री लोचनानां निश्चितं वक्रत्वं शिक्षते[18] तथा तथा मन्मथो निजकशरान् खरप्रस्तरे कठोरपाषाणे तीक्ष्णान् करोतीत्यर्थः ॥ २१

---

7 MS गृह्णाति. 8 MS उच्छंगे. 9 MS स्वजना. 10 MS कुलयुगे. 11 MS अवतटे. 12 MS तु. 13 MS दशोः. 14 MS गिरेहि. 15 MS मनुषेभ्यः. 16 MS अग्गिए. 17 MS श्यामली. 18 MS शिक्षिति.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संगर०— हे सखीति गम्यते । तं मदीयं कान्तं पश्य, यः सङ्ग्रामशतेषु वर्ण्यते । किं कुर्वन्तं, अतिमत्तानां त्यक्ताङ्कुशानां गजानां कुम्भान् दारयन्तमीत्यर्थः ॥ २२

निय मु०— मुग्धा स्त्री निजमुखकरै निजवदनकिरणैरपि अन्धकारे करं हस्तं प्रतिप्रेक्षते पश्यति । शशिमण्डलचन्द्रिकया पुनर्दूरे कथं न पश्यति इत्यर्थः ॥ २३

तुच्छ म० अन्नु जु०— युग्मं । अनयोरर्थः । तुच्छरागेति दूती[19]कृतनायकस्यामन्त्रणम् । हे तुच्छराग, तस्या नायिकायाः[20] अन्यद् यद् तुच्छं तदाख्यातुं न याति । नायिकायाः[20] किंभूतायाः[21] तुच्छमध्यायाः । पुनः किंभूतायाः, तुच्छजल्पनशीलायाः । पु० (=पुनः किंभूतायाः) तुच्छाच्छरोमावल्याः । पु० तुच्छतरहासायाः । पुनः प्रियवचनमलभमानायाः । पु० तुच्छकायमन्मथनिवासायाः तुच्छकायमन्मथनिवासो यस्याः सा । तुच्छकायत्वं भर्तृविरहात्[22] । कठरीत्याश्चर्ये । येन कारणेन मुग्धायाः स्तनान्तरं मनोवर्त्मनि न माति । स्तनयोरतिपीनत्वादंतरस्यातितुच्छत्वं वर्णितं इत्यर्थः ॥ २४–२५

फोडेंति०— यौ स्तनौ आत्मीयं हृदयं स्फोटयतः तयोः परकीया घृणा दया किम् । हे लोका, आत्मानं रक्षत, यतः कारणात् बालायाः विषमौ स्तनौ जातावित्यर्थः ॥ २६

भल्ला हु०— हे भगिनि इदं भव्यं भूतं, यन्मदीयः कान्तो मारितः । यदि भग्नो गृहमैष्यत् तर्हि वयस्याभ्यो वयस्यानां वा–सखीभ्यो–लज्जां प्राप्स्यम् ॥ २७

वायस०— वायसमुड्डापयन्त्या सत्या स्त्रिया सहसेति प्रियो दृष्टः । अर्द्धानि वलयानि मह्यां गतानि भूमौ पतितानि । अर्द्धानि त्रटदिति कृत्वा स्फुटितानि इत्यर्थः ॥ २८

कमल०— अलिकुलानि कमलानि मुक्त्वा करिगण्डानि काङ्क्षन्ति । येषामसुलभं दुर्लभमेष्टुं 'भलि' कदाग्रहो भवति, ते दूरं नापि गणयन्तीत्यर्थः ॥ २९

भग्गउं०— हे सखीति गम्यते । हे सखि, यथा द्वितीयादितिथौ शशिरेखा चन्द्ररेखा प्रकटीभवति तथा प्रियस्य करे करवालं खड्गमुन्मील्यते प्रकटीभवति । किं कृत्वा, निजकबलं भग्नं दृष्ट्वा परस्य बलं प्रसृतं दृष्ट्वेत्यर्थः ॥ ३०

जइ त०— हे तिलतार–तिलवत् स्निग्धा तारा कनीनिका यस्य स, तस्य संबोधनम् । यदि तव स्नेहो मया सह नापि त्रुटितः, तत्कस्मादहं त्वया वक्राभ्यां लोचनाभ्यां शतवारं विलोक्ये–इत्यर्थः ॥ ३१

---

19 MS दुती. 20 MS नायकाया. 21 MS किंभूतायां. 22 MS भतुविरहात्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जहिं क०— यस्मिन् शरेण शिर[23]श्छिद्यते, यस्मिन् खड्गेन खड्गः छिद्यते[24], तस्मिन् तादृशे भटघटानिवहे कान्तो मार्गं प्रकाशयतीत्यर्थः ॥ ३२

एक्कहिं० अंगिहिं०[25]— युग्मं । अनयोरर्थः । तस्या मुग्धाया एकस्मिन्नक्षिणि[26] श्रावणः अन्यस्मिन्नक्षिणि[26] भाद्रपदः । को भावः, यथा एतौ द्वौ मासौ स्राविणौ[27] तथाक्षिद्वयमप्यश्रुजलस्रावि[28]त्वान्मासद्वयतुल्यम् । महीतलस्रस्तरे[29] भूतलसंस्तारके माधवो वसन्तः, पल्लवमयत्वात् । गण्डस्थले शरत् तस्याः कुसुमादिना पाण्डुत्वात् । अङ्गेषु ग्रीष्मः तापबाहुल्यात् । सुखासिकातिलवने मार्गशीर्षः । यथा तिलवनानामुच्छेदः स्यात् तथा सुखावस्थानस्योच्छेदः । मुखपङ्कजे शिशिर आवासितः । यथा शिशिरे पङ्कजानां म्लानत्वं, तथा मुखपङ्कजस्यापि । स्त्रीणां वियोगावस्थायामेतानि चिह्नानि स्युः तेनेत्युक्तम् ॥ ३३–३४

हिअडा०— हे हृदय त्वं त्रटदिति कृत्वा स्फुट, कालक्षेपेन कालविलम्बेन किम् । अहं[30] पश्यामि हतविधिस्त्वया विना दुःखशतानि कुत्र स्थापयति इत्यर्थः ॥ ३५

कंतु म०— हे हले हे सखिके मदीयः[31] कान्तो निश्चयेन यस्य रुष्यति तस्य स्थानं स्फेटयति । कैः, अर्थैः शस्त्रैः हस्तैरपि ॥ ३६

जीविउ०— जीवितं कस्य वल्लभं न स्यात्, धनं पुनः कस्येष्टं न स्यात् । विशिष्टो मनुजोऽवसरे निपतिते द्वे अपि जीवितधने[32] तृणसमे गणयति इत्यर्थः ॥ ३७

एह कु०— एषा कुमारी, एष अहं नरः, एतन्मनोरथस्थानम् । ईदृशं चिन्तयतां[33] वढानां मूर्खाणां पश्चाद्विभातं भवति इत्यर्थः ॥ ३८

जइ पु०— काचित् स्त्री पथिकं प्रत्याह । यदि बृहन्ति गृहाणि पृच्छथ ततो बृहन्ति अमूनि प्रत्यक्षोपलभ्यमानानि वर्तन्ते पृच्छ वा । चेद्दानाभिलाषीति शेषः, तथा कुटीरके विह्वलितजनाभ्युद्धरणं पीडितजनाभ्युद्धरणं कान्तं पश्येत्यर्थः ॥ ३९

आयइं०— लोकस्य इमानि लोचनानि जातिं स्मरन्ति न भ्रान्तिर्न संदेहः । अप्रिये दृष्टे सति मुकुलन्ति संकोचं प्राप्नुवन्ति । प्रिये दृष्टे सति विकसन्ति इत्यर्थः[34] ॥ ४०

सोसउ०— च्चियेति निश्चयेन उदधिः शुष्यतु मा शुष्यतु वा । तेन समुद्रशोषणेन समुद्राशोषणेन वा वडवानलस्य किम् । यदिति क्रियाविशेषणम् । यत् जले ज्वलनो

---

23 MS शिरस्. 24 MS स्छिद्यते. 25 MS अंगिहि. 26 MS ०क्षि॑ 27 MS श्राविणौ. 28 MS ०श्रावि. 29 MS ०श्रस्तरे. 30 MS ऽहं. 31 MS मदीय. 32 MS जीवतधने. 33 MS चिंततां. 34 MS त्यर्थ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्वलति, अनेन जलज्वलनेन तस्य वडवानलस्य किं न पर्याप्तं, किं न स्रुतमित्यर्थः ॥ ४१

आयहो०— अस्य दग्धकलेवरस्य यद्वाहितं तदेव सारम् । मरणानन्तरमिति शेषः । यदि आच्छाद्यते स्थाप्यते ततः कुथ्यति, अथ दह्यते ततः क्षारो भस्म स्यादित्यर्थः ॥ ४२

साहु वि०— सर्वो लोक उत्ताम्यति आकुलीभवति । किमर्थं, बृहत्त्वस्यार्थे । परं बृहत्त्वं हस्तेन मुत्कुलेन प्राप्यते । को भावः, जनैः महत्त्वं तदा प्राप्यते चेद्दानादिगुणाः[35] स्युरिति भावः ॥ ४३

जइ सु०— हे दूति स यदि गृहं नावति नागच्छति तर्हि तव अधोमुखं कथम् । हे सखिके यस्तव वचनं खण्डयति स मम प्रियो न भवतीत्यर्थः ॥ ४४

काइं न०— पूर्ववत् ॥

सुपुरि०— सुपुरुषाः कङ्गोः धान्यस्य अनुहरन्ते सदृशा भवन्ति, भण कथय केन कार्येण । उच्यते, यथा यथा वृद्धत्वं लभन्ते तथा तथा शिरसा नमन्तीत्यर्थः ॥ ४५

जइ स०— कस्याश्चित् देशान्तरं भर्ता गतोऽस्ति, स मेघं प्रत्याह । सा स्त्री यदि सस्नेहा भविष्यति तदा मृता भविष्यति, मम विरहात् । अथ जीवति, तर्हि निःस्नेहा[36] । द्वाभ्यां सस्नेहनिःस्नेह[37]लक्षणाभ्यां प्रिया गतिका गता । तर्हि हे खलमेघ – हे दुर्जन[38]मेघ, त्वं किं गर्जसे इत्यर्थः ॥ ४६

भमर०— हे भ्रमर, त्वमरण्ये मा रुणझुणु शब्दं मा कुरु, तां दिशं विलोक्य मा रुदिहि । पुनः सा मालती देशान्तरिता यस्या वियोगे त्वं म्रियसे इत्यर्थः ॥ ४७

पइं मु०— गाथा । त्वया मुक्तानामपि पत्राणां पत्रत्वं न स्फिटति । तव पुनश्छाया यदि भवेत् ततस्तर्हि तैः पत्रैरेव नान्यथेत्यर्थः ॥ ४८

महु हि०— काचित् नायिकाऽन्यासक्तं पतिं वक्ति । मम हृदयं त्वया गृहीतमिति शेषः । तया त्वं गृहीतः[39] । सापि अन्येनापि नट्यते । हे प्रियाऽहं किं करोमि, त्वं किं करोषि, मत्स्येन मत्स्यो गिल्यते इत्यर्थः ॥ ४९

पइं म०— त्वयि मयि द्वयोरपि रणगतयोः को जयश्रियं तर्कयति – अभिलषति । को यमगृहिणीं केशैर्गृहीत्वा सुखं यथास्यात्तथा तिष्ठति, त्वं भण – कथयेत्यर्थः ॥ ५०

पइं मे०— स्त्री कथयति त्वां मुञ्चन्त्या मम मरणं, मां मुञ्चतस्तव मरणम् । दृष्टान्तः – यथा सारसः पक्षी यस्य यो दूरे स कृतान्तस्य साध्यो भवति, मरणं प्राप्नोतीत्यर्थः ॥ ५१

---

35 MS ०गुणा. 36 MS निस्नेहा 37 MS निस्नेह. 38 MS दुर्ज्जन. 39 MS गृहितः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुम्हेहिं[40] ०— युष्माभिरस्माभि र्यत् कृतं तत्बहुकजनेन दृष्टम् । यत् किं कृतं तदाह । तत्तावन्मानः[41] समरभर एकक्षणेन निर्जित इत्यर्थः ॥ ५२

तउ गुण०— महीमण्डलेऽन्ये जना यदि उपेत्य तव पार्श्वे समागत्य तव गुणसंपदं शिक्षन्ते[42], तव मतिं शिक्षन्ते[42], तवानुत्तरां क्षांतिं शिक्षन्ते[42], तदा वरमिति गम्यते इत्यर्थः ॥ ५३

अम्हे थो०[43]— वयं स्तोकाः रिपवस्तु बहुकाः । हे मुग्धे गगनतलं निभालय – पश्य, कति जना ज्योत्स्नां कुर्वन्ति । एकश्चन्द्र एवेत्यर्थः ॥ ५४

अंबणु०— ये केऽपि परकीयाः पथिका अम्लत्वं[44] स्नेहं लगयित्वा गताः, तेऽपि अवश्यं निश्चितं सुखासिकायां न स्वपन्ति । यथा वयं तथा तेऽपि इत्यर्थः ॥ ५५

मइं जा०— हे प्रिय, मया ज्ञातं – विरहितानां पुरुषाणां कापि धरा अवलम्बनं भवति । कदा – विकाले, सन्ध्याकाले । णवरं केवलं यथा दिनकरः क्षयकाले गतस्तथा मृगाङ्कोऽपि तपतीत्यर्थः ॥ ५६

महु कं०— हे हल्लि हे सखि मम कान्तस्य द्वौ दोषौ स्तः, अनर्थकं मा जल्प । कौ द्वौ दोषौ तदाह । एकस्तावद्दानं ददतः सतः परं केवलं अहमुद्धरिता । अपरस्तावत् युध्यतः षड्गमुद्धरितमिति निन्दास्तुतिरित्यर्थः ॥ ५७

जइ भ०— हे सखि यदि परकीया भग्नास्ततो मम प्रियेण । अथास्माकं संबन्धिनश्चेत् भग्ना[45]स्ततस्तेन मम भर्त्रा मारितेनैवेत्यर्थः ॥ ५८

मुह क०— तस्याः मुखकबरीबन्धौ वदनवेणीबन्धौ शोभां धरतः । नं, उत्प्रेक्षते — शशिराहू[46] मल्लयुद्धं कुरुतः । तस्याः कुरलाः केशाः शोभन्ते, किं (=किंभूताः), भ्रमरकुलतुलिताः । नं, उत्प्रेक्षते – तिमिरडिम्भा अन्धकारबालका मिलित्वा क्रीडन्तीत्यर्थः ॥ ५९

बप्पीहा०— हे बप्पीह प्रिय प्रिय इति भणित्वा कियत् रोदिषि । हे हताश, तव जलधरेण मम वल्लभेन द्वयोरपि आशा न पूरितेत्यर्थः ॥ ६०

बप्पीहा०— हे बप्पीहक, किं वारंवारं कथनेन । हे निर्घृण[47], हे निर्लज्ज, विमलजलेन सागरे भृते एकामपि धारां न लभसे – इत्यर्थः ॥ ६१

---

40 MS तुम्हेहि. 41 MS तत्तावत् मानः. 42 MS शिक्षयंति. 43 MS वो. 44 MS आम्लत्वं. 45 MS भग्ना. 46 शशिराहु. 47 निघृण.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आयहिं०— हे गौरि, हे पार्वति[48], त्वमस्मिन् जन्मनि अन्यस्मिन्नपि जन्मनि मम कान्तं दद्याः, यो हसन् मत्तानां त्यक्ताङ्कुशानां गजानां संगच्छते – सन्मुखो भवतीत्यर्थः ॥ ६२

बलि अ०— बलेरभ्यर्थने सोपि मधुमथनो नारायणोऽपि लघुकीभूतः। अथ यदीच्छत वृद्धत्वं बृहत्वं तर्हि परं ददत, कोऽपि मा मार्गयत[49] – इत्यर्थः ॥ ६३

विहि वि०— विधिर्विनटयतु, ग्रहाः पीडयन्तु, हे प्रिये विषादं मा कुरु। वेषमिव संपदं कर्षामि यदि व्यवसायोऽर्घेति स्यात्। तदा संपदः सुलभा इत्यर्थः ॥ ६४

खग्गि वि०— हे प्रिये, खड्गेन विसाधितं लभामहे तस्मिन् देशे यामः। वयं रणदुर्भिक्षेण भग्ना युद्धेन विना न वलामहे न रतिं प्राप्नुमः इत्यर्थः ॥ ६५

कुंजर०— हे कुंजर मा स्मर सल्लकीः, सरलान् दीर्घान् श्वासान्[50] मा मुञ्च। विधिवशेन ये कवलाः प्राप्तास्तान् चर मानं मा मुञ्चेत्यर्थः ॥ ६६

भमरा०— हे भ्रमर अत्रापि लिंबे तावत् कति दिवसान् विलम्बस्व, यावत् घनपत्रवान् छायाबहुलः कदम्बः प्रफुल्लतीत्यर्थः ॥ ६७

प्रिय ए०— हे प्रिय इदानीं करे सल्लं भल्लं कुरु, त्वं करवालं मुञ्च, येन कारणेन वराकाः कापालिका योगिनः कपालं लान्तीत्यर्थः ॥ ६८

दिअहा०— दिवसा वेगै र्यान्ति, मनोरथाः पश्चात् पतन्ति। यदस्ति तन्मान्यते भुज्यते। भविष्यति इति कुर्वन् मास्व मा तिष्ठेत्यर्थः ॥ ६९

संता भो०— यः सतो विद्यमानान् भोगान् परिहरति तस्य कान्तस्य बलिं पूजां क्रिये। यस्य शीर्षे खल्वाटं तस्य दैवेनैव मुण्डितम्। को भावः। यस्य भोगा न सन्ति स तु स्वयमेव त्यजतीत्यर्थः ॥ ७०

अइ तुं०—यत् स्तनानां अति तुङ्गत्वं स छेदकः छेहु न तु लाभः। हे सखि, यदि कथमपि त्रुटिवशेन कालविलम्बेन नाथोऽधरे प्रभवति अन्यथा लगत्येव न, स्तनयोरतितुङ्गत्वादित्यर्थः ॥ ७१

एत्तउं०— दुर्योधनोक्तिरियम्। शकुनिर्भीम[51]मातुल ईयत् ब्रूत्वा (=उक्त्वा) स्थितः, अहं ततस्तर्हि जाने। पुनर्दुःशासनो[52] ब्रूत्वा (=उक्त्वा) स्थितः। यदि एष हरिर्ममाग्रे ब्रूत्वा (=उक्त्वा) तिष्ठतीति शेषः ॥ ७२

---

48 Ms पार्वती. 49 Ms मार्गयत. 50 Ms स्वास. 51 Ms शकुनिभीम०
52 Ms पुनदुःशानो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिम ति०— यथा तथा शशी चन्द्रस्तीक्ष्णान् करान् लात्वा यद्यतक्षिष्यत ततो जगति गौर्याश्चन्द्राननायाः[53] मुखकमलेन सह कामपि सदृशतामलप्स्यतेत्यर्थः ॥ ७३

चूडुल्लु०— हे मुग्धे कपोले निहितः स्थापितश्चूटकश्चूर्णीभविष्यति । किं० ( = किम्भूतः ) चूटकः । श्वासानलज्वाला[54]दग्धः । पुनः[55] किं० । बाष्पसलिलसंसिक्त इत्यर्थः ॥ ७४

अब्भड०— प्रेमशब्देन प्रिया वाच्या अभेदोपचारात् । यथा प्रेमवतीति उच्यते तथा प्रेमापीत्युच्यते । प्रियमिति शेषः । प्रियमब्भडवंचिउ इति अनुव्रज्य मुत्कालाप्य यावत् द्वौ पादौ निवर्तते तावत् सर्वाशनरिपुसंभवस्य चन्द्रस्य किरणाः परिवृताः प्रसृता इत्यर्थः । सर्वमश्नातीति नंद्यादि इत्यन् प्रत्ययः । सर्वाशनोऽग्निः तस्य रिपुर्जलं तत्संभवश्चन्द्रः ॥ ७५

हियइ०— गौरी स्त्री हृदये शल्यायते[56] । मेघो गगने गर्जति । वर्षारात्रौ प्रवासिकानां चलितानां विषमं सङ्कटमेतदित्यर्थः ॥ ७६

अम्मि प०— हे अम्ब मम पयोधरौ वज्रमयौ स्तः, यौ नित्यमेव तस्य मम कान्तस्य सन्मुखौ तिष्ठतः । तस्येति कस्य — यस्याग्रे गजघटाः[57] समराङ्गणे भङ्क्त्वा यान्तीत्यर्थः ॥ ७७

पुत्तें जा०— जातेन पुत्रेण को गुणः, मृतेन पुत्रेण कोऽप्यगुणः[58] । येन पुत्रेण सतेति गम्यते । या पैतृकी भूमिरपरेणाक्रम्यत इत्यर्थः ॥ ७८

तं तेत्तु०— सागरस्य तत्तावज्जलं स तावन्मात्रो विस्तारः । परं केवलं तृषाया निवारणं पल[59]मपि नैव स्यादिति शेषः । असारः सन् शब्दायते इत्यर्थः ॥ ७९

जं दिट्ठ०— असतीभिर्यत्सोमग्रहणं दृष्टं तन्निःशंकं[60] यथा स्यात् तथा हसितम् । हे राहो, प्रियमानुषविक्षोभकरं इष्टपुरुषवियोगकरं मृगाङ्कं गिलगिलेत्यर्थः ॥ ८०

अम्मीए०— स्त्री कथयति, हे अम्ब स्वस्थावस्थैः स्वस्थचित्तैः सुखेन मानश्चिन्त्यते, अहंकारः क्रियते । परं प्रिये दृष्टे सति हल्लोहलेन व्याकुलत्वेन कः आत्मानं चेतयतीत्यर्थः ॥ ८१

---

53 MS चन्द्राननयाः. 54 MS स्वासानलज्वला. 55 MS पुन.
56 MS शल्यायति. 57 MS गजघटः. 58 MS कोपिगुणो.
59 MS पल०. 60 MS न्शिंकं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सवधु०— शपथं कृत्वा मया कथितं परं केवलं तस्य जन्म सफलकं यस्य त्यागो न प्रमृष्टः न मुषितः[61], दानं न गतं, यस्य चारभटी न प्रमुषिता, शूरवृत्ति[62]र्न गता, यस्य धर्मो न च प्रमृष्टः, न प्रमुषितः इत्यर्थः ॥ ८२

जइ के०— स्त्री कथयति — यदि कथंचित् प्रियं प्राप्स्ये तर्हि अकृतं कौतुकं करिष्यामि । यथा नवे शरावे पानीयं सर्वाङ्गेण प्रविशति तथा सर्वाङ्गेण प्रवेक्ष्यामीत्यर्थः ॥ ८३

उअ क०— त्वं पश्य, कर्णिकारो वृक्षः प्रफुल्लितः काञ्चनकान्तिप्रकाशः । तं उत्प्रेक्ष्यते — गौरीवदनविनिर्जितः सन् वनवासं सेवते इत्यर्थः ॥ ८४

वासु म०— व्यासो महर्षिः एतद्[63] भणति — यदि श्रुतिशास्त्रं प्रमाणं, मातॄणां[64] चरणौ नमतां सतां दिवसे दिवसे गङ्गास्नानं इत्यर्थः ॥ ८५

केम स०— दुष्टो दिनः कथं समाप्यताम् । रात्रिः[65] कथं भवति । छुड यदि सोऽपि नववधूदर्शनलालस एवंविधानिति शेषो, मनोरथान् वहतीत्यर्थः ॥ ८६

उं गोरी०— उं ( = ओँ ) सूचनायां, गौरीमुखविनिर्जितो मृगाङ्को वार्दले निलीनः । अन्योऽपि यः परिभूततनुः स निःशङ्कं कथं भ्रमतीत्यर्थः ॥ ८७

बिंबाह०— हे श्रीआनन्द, तन्व्या बिंबाधरे रदनव्रणं दन्तव्रणं कथं स्थितम् । उत्तरं ददाति — जणु उत्प्रेक्ष्यते प्रियेण अधरस्य निरुपमं रसं पीत्वा शेषस्य रसस्य मुद्रा दत्तेत्यर्थः ॥ ८८

भण स०— हे सखि, मां प्रति निभृतं छन्नं यथा स्यात्तथा भण, कथय, यदि त्वया प्रियः सदोषो दृष्टः । तस्य पक्षापतितं तस्यान्यतरस्य[66] पार्श्वे स्थितं मम मनो यथा न जानाति भर्त्तेति गम्यते, ममाग्रे तथा त्वया छन्नं वाच्यमित्यर्थः ॥ ८९

मई भ०— हे बलिराज मया त्वं भणितः, कीदृग् मार्गण एषः । बलि[67]राह । हे वढ, हे मूर्ख, यादृक्तादृक् न भवति, इदृक् स्वयं नारायण इत्यर्थः ॥ ९०

जइ सो०— यदि प्रजापतिः कुत्रापि शिक्षां लात्वा यत्रापि तत्रापि अत्र जगति घटयति, तर्हि भण कथय, तस्याः[68] सदृक्षं को घटयतीत्यर्थः ॥ ९१

जाम्व न०— यावत् कुम्भतटे सिंहचपेटाचटत्कारो न निपतति, तावत् समस्तानां मदकलानां गजानां पदे पदे ढक्का वाद्यते इत्यर्थः ॥ ९२

---

61 MS मुखितः 62 MS सूरवृत्ति. 63 MS एतत्. 64 MS मातृणां. 65 MS रात्रि. 66 MS तस्याऽन्यनरस्य. 67 MS बहि० 68 MS तस्या.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिलहं० — परं केवलं तिलानां तिलत्वं तावत्, यावत् स्नेहा न गलन्ति। स्नेहे प्रणष्टे त एव तिलाः तिला भ्रष्टा खला भवन्ति इत्यर्थः ॥ ९३

आम्वहिं० — यावज्जीवानां मध्ये विषमा कार्यगतिः एति तावदास्तामितरजनः स्वजनोप्यन्तरं ददाति पृष्ठिं ददातीत्यर्थः ॥ ९४

ते मुग्ग० — ये तेषां परिवेषितास्ते मुद्गाः हारिताः मुधा जाताः, येषां परस्परं युध्यतां सतां स्वामी गञ्जितः पीडित इत्यर्थः ॥ ९५

बम्भ ते० — हे ब्रह्मन् ते केपि नरा विरलाः ये सर्वाङ्गैर्दक्षाः, ये वक्रास्ते वञ्चकतराः अत्यर्थं वञ्चकाः[69]। ये तु ऋजवस्ते बलीवर्दाः मूर्खा इत्यर्थः ॥ ९६

अन्ने ते० — ते दीर्घे लोचनेऽन्ये एव। अन्यदेव तद्भुजयुगलम्। सोऽन्यो घनस्तनभारः। घनो निबिडः[70]। तदन्यदेवमुखकमलम्। अन्य एव स केशकलापः। प्रायः[71] स विधिरन्य एव येन सा नितम्बिनी घटिता। किं० (= किम्भूता), सा गुणलावण्यनिधिः इत्यर्थः ॥ ९७

प्राइव० — प्रायो मुनीनामपि भ्रान्तिः, ते मणीयकान् (sic मणिकान् ?) गणयन्ति। अक्षये निरामये परमपदेऽद्यापि लयं न लभन्ते। किं शून्य[72]ध्यानेनेत्यर्थः ॥ ९८

अंसु ज० — हे सखि, प्रायो गौर्या अश्रुजलेन नयनसरसी उद्वृत्ते उल्लटिते। ते सन्मुखे संप्रेषिते परं केवलं तिर्यग्[73] घातं ददत इत्यर्थः ॥ ९९

एसी पि० — प्रिय एष्यति समागमिष्यति। अहं रुषिष्यामि। रुष्टां मामनुनयति मनावइ। प्रायो दयिता एतान्मनोरथान् दुष्करान् करोति, इष्टकालेऽनागमनात्, इत्यर्थः ॥ १००

विरहा० — कोऽपि कविर्जले धूमं दृष्ट्वाऽह। कोऽपि पथिको विरहानलज्वालाकरालितः पीडितो ब्रुडित्वा स्थितोऽस्ति। अन्यथा शिशिरकाले शीतलजलाद्धूमः कुत उत्थित इत्यर्थः ॥ १०१

महु कं० — गोष्ठस्थितस्य मम कान्तस्य कुतः कुटीरकाणि ज्वलन्ति। अथ रिपुरुधिरेण विध्यापयति, अथात्मीयेन न भ्रान्तिः इत्यर्थः ॥ १०२

पिय सं० — प्रियसंगमे कुतो निद्रा प्रियस्य परोक्षस्य सप्तम्याः षष्ठी[74]। प्रिये परोक्षे सति कथं निद्रा। मया[75] द्वेऽपि विनाशिते निद्रा न एवं न तथेत्यर्थः ॥ १०३

---

69 MS वंचका. 70 MS निबड. 71 MS प्राय. 72 MS शुन्य.
73 MS तियग्. 74 MS षष्टी. 75 MS ममा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कंतु जु०— कान्तो यत् सिंहेन सहोपमीयते तन्मम मानः खण्डितः । सिंहो नीरक्षान् रक्षपालरहितान् गजान् हन्ति । प्रियः पदरक्षैः पदातिरक्षैः समं गजान् हन्तीत्यर्थः ॥ १०४

चंचलु०— जीवितं चञ्चलं, मरणं ध्रुवम्, हे प्रिये रूष्यते कथम् । रोषणस्य दिवसा दिव्यानि वर्षशतानि भविष्यन्तीत्यर्थः ॥ १०५

माणि प०— माने प्रणष्टे यदि तनु नं त्यज्यते ततो देशस्त्यज्यते । परं दुर्जनकरपल्लवैर्दर्श्यमानो मा भ्राम्यत् न भ्रमतीत्यर्थः ॥ १०६

लोणु वि०— हे मेघ मा गर्ज । लवणं लावण्यं पानीयेन विलीयते, ज्वालितो मेघो गलति, सकुटीरिका गौरी तिम्यति भीजइ ॥ १०७

विहवि०— विभवे[76] प्रणष्टे वक्रः, ऋद्धौ जनसामान्यो भवति, सर्वजनतुल्यो भवति । शशी किमपि मम प्रियस्यानुहरति सदृशो भवति मनाक् नान्य इत्यर्थः ॥ १०८

किर खा०— किल न खादति, न पिबति, न विद्रवति ददाति, धर्मे रूपकं न व्ययति । इह कृपणो न जानाति यथा यमस्य दूतः क्षणेन प्रभवतीत्यर्थः ॥ १०९

जाइज्ज०— तत्र देशे गम्यते यत्र प्रियस्य प्रमाणं लभ्यते । यद्यागच्छति तत आनीयते । अथवा तदेव ।नवार्णं, स एवान्तः इत्यर्थः ॥ ११०

जउ पव०— स्त्री कथयति – यत् प्रवसता प्रवासं कुर्वता सता सह न गता, अथ तस्य वियोगेन न मृता । तर्हि तस्य सुभगजनस्य सन्देशान् ददतीभिरस्माभि र्लज्यते[77] इत्यर्थः ॥ १११

एत्तहे०— मेघा जलं पिबन्ति, इतो वडवानल आवर्त्तयति शोषयति । सागरस्य गभीरिमां [sic गभीरिमाणं] पश्य, एकापि कणिका नहि अपवर्त्तते ऊना न भवतीत्यर्थः ॥ ११२

जाउ म०— स्त्री कथयति । यातु । यान्तं मा पल्लवत प्रतिषेधयत । पश्यामि कति पदानि ददाति । हृदयेऽहमेव तिरश्री (sic तिरश्चीना) । (आडी रही छउं ।) परं केवलं प्रियो डंबराणि करोति । न तु यास्यति इति शेषः ॥ ११३

हरि न०— प्राङ्गणे हरिर्नर्तितः, लोको विस्मये पातितः । इदानीं राधापयोधरयो र्यत् प्रतिभाति तद्[78] भवतु इत्यर्थः ॥ ११४

---

76 MS विहवे.    77 MS लभ्यते.    78 MS तद.

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

साव स०— गौरी[79] सर्वसलावण्या कापि नवीना विषग्रंथि: । यस्य कण्ठे न लगति स भट: कामुक: प्रत्युत प्रथमं म्रियते इत्यर्थ: ॥ ११५

मइं वु०— हे वृषभ मया उक्तं त्वं धुरं धर, कसरैर्गलवृषभै र्वयं विगोपिता: । हे धवल, हे वृषभ, त्वया विना भारो न चटति । एवमेव विषण्ण: कथमित्यर्थ: ॥ ११६

एकु क०— एकं कदापि नागच्छसि, अन्यत: शीघ्रं यासि । हे मित्र, मया त्वं प्रमाणितो ज्ञात: – त्वया यादृश:[80] खलो नहि ॥ ११७

जिम्व सु०— यथा सत्पुरुषा: बहव: सन्तीति शेष: तथा झगटका:, यथा नद्यस्तथा वलना।न, यथा गिरयस्तथा कोटराणि । तर्हि हे हृदय कथं खिद्यसे इत्यर्थ: ॥११८

जे छड्डे०— ये रत्ननिधिं मुक्त्वा आत्मानं तटे क्षिपन्ति[81], परं केवलं तेषां शङ्खानां अस्पृश्यसंसर्ग एव । ये पूत्क्रियमाणा भ्रमन्तीत्यर्थ: ॥ ११९

दिवेहिं०— हे वढ[82], हे मूर्ख, दैवार्जितं खाद, मा सञ्चय[83] एकमपि द्रम्मम् । किमपि तद्[84] भयं पतति येन[85] जन्म समाप्यते इत्यर्थ: ॥ १२०

एकमे०— हरि: सुष्ठु अत्यर्थं सर्वादरेण एकैकं[86] वस्तु यद्यपि पश्यति ततोऽपि दृष्टि र्यत्रक्कापि राधा । क: शक्नोति संवरीतुं दग्धे नयने स्नेहेन पर्यस्ते व्याकुलिते इत्यर्थ: ॥ १२१

विहवे०[87]— विभवे कस्य स्थिरत्वं, यौवने कस्य गर्व: । स लेख: प्रस्थाप्यते यो लगति गाढम् । वियोगिनां वचनं इदमित्यर्थ: ॥ १२२

कहिं स०— कुत्र शशी कुत्र मकरधरसमुद्र:, कुत्र बर्ही कुत्र मेघ: । दूरस्थितानामपि सज्जनानामसाधारण: स्नेह: भवतीत्यर्थ: ॥ १२३

कुंजरु०— कुञ्जरोऽन्येषु तरुषु कौतुकेन[88] हस्तं क्षिपति, मन: पुन: एकस्यां शल्लक्यां, यदि पृच्छत परमार्थं[89]मित्यर्थ: ॥ १२४

खेड्डयं०— अस्माभि र्निश्चयं क्रीडा कृता, किं प्रजल्पत । हे स्वामिन्, अनुरक्ता: भक्ता:, अस्मान्मा त्यजेत्यर्थ: ॥ १२५

सरिहिं०[90]— सरिद्भि र्नदीभि: सरोभि: सरोवरै र्महत्सरोभिर्नाप्युद्यान[91]वनै र्देशा रम्या:[92] । हे वढ, हे मूर्ख, निवसद्भि: सुजनै: देशा रम्या भवन्तीत्यर्थ: ॥ १२६

---

79 MS गोरी. 80 MS यादृशो. 81 MS क्षपंति. 82 MS वट.
83 MS सिंचतु. 84 MS तत्. 85 MS ये. 86 MS एकेकं.
87 MS विहवे० विभवे० 88 MS कौतकेन. 89 MS परमार्थत०
90 MS सरहि. 91 MS नाप्युद्यान० 92 MS रम्या.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हिअडा०—हे हृदय, हे भंडय निर्लज्ज, हे अद्भुतसार, त्वया मममिमे शतवारं जल्पितं, प्रियेण प्रवसता सह अहं स्फुटिष्यामि,[93] इत्यर्थः ॥ १२७

एक कु०—एका कुटी शरीरं पंचभिरिन्द्रियै रुद्धा। तेषां पञ्चानां पृथक् पृथक् बुद्धिः। हे भगिनि, कथय तद्गृहं कथं नन्दतु यत्र कुटुम्बं[94] आत्मच्छन्दकं, इत्यर्थः ॥ १२८

जो पुण०—यः पुनर्मनस्येव व्याकुलीभूतः सन् चिन्तयति[95] द्रम्मं न ददाति न रूपकम्। स मूढो रतिवशेन भ्रमणशीलः सन् कराग्रोल्लालितं कुन्तं भल्लं गृहें एव गणयति चालयति इत्यर्थः[96] ॥ १२९

चलहिं०—हे बाले, चलैर्वलमानैश्च लोचनै त्वया दृष्टाः तेषु[97] मकरध्वजावस्कन्दः[98] कन्दर्पधाटी पतति। कदा, अपूर्णे काले इत्यर्थः ॥ १३०

गयउ०[99]—हे हरिणाः, स केसरी गतो, यूयं निश्चिन्ता सन्तो जलं पिबत, यस्य सम्बन्धिना हुंकारेण मुखेभ्यस्तृणानि पतन्ति ॥ १३१

सत्थाव०—स्वस्थावस्थानामालपनं सर्वो लोकः करोति। परं आर्तानां मा भैषीः इति यः आश्वासनां[100] ददाति स[101] सज्जन इत्यर्थः ॥ १३२

जइ र०—हे हृदय, हे मुग्धस्वभाव, यद्यद्दृष्टं तत्र तत्र यदि रज्यसे, तत् तर्हि त्वया लोहेनेव स्फुटता सता घनस्तापः[102] सहिष्यते, इत्यर्थः ॥ १३३

मइं[103] जा०—मया ज्ञातं अहं प्रेमहृदे ब्रुडिष्यामि हुहुरुत्ति शब्दानुकरणं कृत्वा। नवरं केवलं मया विप्रियनौः वियोगबेडा झटिति पतिता प्राप्तेत्यर्थः ॥ १३४

खज्जइ०—कसरत्कैः[104] न खाद्यते, घुंटैः[105] न च पीयते। एवमेव सुखस्या समाधिर्भवति। क सति नयनाभ्यां प्रिये दृष्टे सतीत्यर्थः ॥ १३५

अज्जवि०—अद्यापि नाथो ममैव गृहे सिद्धार्थान् वन्दते, अर्थाच्चलितुकामोऽस्ति। तावदेव विरहो गवाक्षेषु मर्कटचेष्टां ददातीत्यर्थः ॥ १३६

सिरि ज०—ततोऽपि मुग्धया[106] गोष्ठं[107] गोकुलं तत्र तिष्ठन्तीति[108]

---

93 MS स्फुटिष्यामि
94 MS कुटंबं
95 MS चंतयति
96 MS ऽर्थः
97 MS ते
98 MS मकरध्वजवस्कन्दः
99 MS गमउ
100 MS आस्वासनां
101 MS omits
102 MS तापाः
103 MS मइ
104 MS कसंरत्कैः
105 MS घंटैः
106 MS मुग्धाया
107 MS घोष्टं
108 MS तिष्टंतीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोष्ठाः[109]। 'तात्स्थ्यात्[110] तद्व्यपदेशः' इति न्यायात् गोष्ठस्थाः[111] पुरुषा उत्थानो[112]पवेसनं चेष्टानुकरणं कारिताः। यस्याः स्त्रियाः शिरसि जराखंडिता कोम्पुटी जीर्णा कम्बलिका वर्तते, यस्या गले विंशतिर्मणीयकाः न सन्तीत्यर्थः ॥ १३७

अम्मडि०—हे अम्ब, पश्चात्तापो वर्तते, विकाले संध्यायां प्रियः[113] कलहायितः कलहयुक्तो विहितः। विनाशकाले विपरीता बुद्धिर्भवतीत्यर्थः ॥ १३८

ढोल्ला ए०—हे नायक एषा परिभाषा रीति 'अतिभन' अत्यद्भुता वर्तते इति शेषः। हे प्रिय अहं तव कृते क्षयं प्राप्नोमि[114], त्वं पुनरन्यस्यार्थे क्षीयसे इत्यर्थः ॥ १३९

सुमरिं०—तद्दुर्लभं वस्तु स्मर्यते यन्मनाक् विस्मरति। यस्मिन् वस्तुनि पुनः[115] स्मरणं यावद्गतं तस्य स्नेहस्य किं नाम। न किंचिदित्यर्थः[116] ॥ १४०

जिब्भिदि०—जिह्वेन्द्रियं नायकं वशे कुरुत, अन्यानीन्द्रियाणि यस्याधीनानि वर्तन्ते इति शेषः। तुम्बिन्या मूले विनष्टे अवश्यं पर्णानि शुष्यन्तीत्यर्थः ॥ १४१

एकसि०—एकशः एकवारं शीलं कलङ्कितं येषां ते शीलकलङ्कितानामालोचनरूपाणि प्रायश्चित्तानि दीयन्ते। यः पुनः अनुदिवसं खण्डयति तस्य प्रायश्चित्तेन किमित्यर्थः ॥ १४२

विरहा०—पथि मार्गे पथिको विरहानलज्वालाकरालितः पीडितो[117] यस्माद्दृष्टः तं तस्मात् सर्वैरपि पथिकैः मिलित्वा स एव पथिको अग्निष्ठः[118] कृतः। लोके तु 'अंगीठउं' इति ॥ १४३

साम्मि प०—स्वामिप्रसादः, सलज्जः प्रियः, सीमासंधौ वासः, बाहुबलं प्रेक्ष्य धण इति नायिका निःश्वासं[119] मुञ्चतीत्यर्थः ॥ १४४

पहि०—हे पथिक, गौरी दृष्टा मयेति गम्यते। किं कुर्वन्ती दृष्टा। मार्गं पश्यन्ती। पुनः किं०। अश्रुश्वासाभ्यां कंचुकं[120] तीमोद्वानं आर्द्रं[121]शुष्कं कुर्वतीत्यर्थः ॥ १४५

पिउ०[122]—प्रिय आगतः[123]। वार्ता श्रुता। ध्वनिः[124] कर्णे प्रविष्टः।

---

109 MS गोष्टाः 110 MS तास्थ्यात् 111 MS गोष्टस्था
112 MS उत्थनो 113 MS प्रिय 114 MS प्राप्नोति
115 MS पुन 116 MS किंदिं० 117 MS पीडतो
118 MS अग्निष्ट 119 MS निःस्वासं 120 MS कंचूकं
121 MS आद्र 122 MS पहिया० 123 MS आवितः 124 MS ध्वनि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य विरहस्य नश्यतः[125] सतः धूलिरपि न दृष्टेत्यर्थः ॥ १४६—

संदेसें०[126]—युष्मदीयेन संदेशेन किं, यद्यस्मात् सङ्गाय न मिल्यते। हे प्रिय, स्वप्नान्तरेऽपि पीतेन पानीयेन किं पिपासा तृषा छिद्यते। अपि तु नेत्यर्थः ॥ १४७

एत्तहे०—अत्र तत्र द्वारि गृहे लक्ष्मी विसंष्ठुला[127] भवति। प्रियप्रभ्रष्टा गौरीव कुत्रापि निश्चला न तिष्ठति[128] इत्यर्थः ॥ १४८

एउ गृ०—केनापि सिद्धपुरुषेण विद्यासिद्धये नायिकां प्रति धनादिकं दत्वा भर्तरि प्रार्थिते नायिकायाः[129] उक्तिरियम्। एतद्[130] गृहीत्वा[131] यन्मया यदि प्रिय उद्वार्यते[132] त्यज्यते[133] तर्हि मम कर्तव्यं किमपि नापि परं केवलं मर्तव्यमेव दीयते इत्यर्थः ॥ १४९

देसुच्चा०—देशोच्चाटनं देशपरित्यागः शिखिकथनं अग्नितापः घनकुट्टनं यल्लोके वर्तते तत्सर्वं मञ्जिष्ठया[134]ऽतिरक्तया साढव्यम्। एतावताऽतिरक्तत्वं विरूपं इत्यर्थः ॥ १५०

सोएवा०—पुष्पवतीभिः ऋतुमतीभिः समं स्वपितव्यं परं वारितम्। ताभिः समं पुनर्जागर्तव्यं को बिभर्ति यदि स वेदः प्रमाण इत्यर्थः ॥ १५१

हियडा०—हे हृदय, यदि रिपवो घनाः ततः किं आकाशे आरुह्यामः। अस्माकं हस्तौ। यदि पुनर्म्रियामहे तर्हि मारयित्वेत्यर्थः ॥ १५२

रक्खइ०[135]—सा विषहारिणी पानीयहारिका तौ करौ चुम्बित्वा जीवितं रक्षति। तौ कौ। याभ्यां कराभ्यां प्रतिबिंबितमुञ्जालं (= ०मुञ्जवत्) जलमनवगाह्य पीतमित्यर्थः ॥ १५३

बाह बि०—मम बाहू विच्छोटय त्वं यासि। भवतु। तथा को दोषः। हे मुञ्ज, हृदयस्थितस्त्वं यदि निःसरसि[136] तर्हि जाने सरोष इत्यर्थः ॥ १५४

जेप्पिअ०[137]—अशेषकषायबलं भित्वा, जगतोऽभयं दत्त्वा, महाव्रतानि[138] लात्वा, तत्त्वं ध्यात्वा, शिवं लभन्ते ॥ १५५

देवं दु०—निजकं धन दातुं दुष्करम्[139]। तपः कर्तुं न प्रतिभाति। एवमेव सुखं भोक्तुं मनः परं भोक्तुं न याति ॥ १५६

---

125 MS नस्यतः  126 MS संदेशे  127 MS विसंस्तुला  128 MS तिष्ठति
129 MS नायिका  130 MS एतत्  131 MS गृहित्वा
132 MS उद्वर्यंते  133 MS तज्यते  134 MS मंजिष्टया
135 MS रुखइ  136 MS निःसरति  137 MS जेप्पिय०
138 MS माहु०  139 MS दुःकरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जेप्पि च०—शान्तिना तीर्थंकरेण बिना सकलां धरां जेतुं त्यक्तुं, तपो लातुं पालयितुं कः शक्नोति भुवनेपीत्यर्थः ॥ १५७

गंप्पिणु०—ये नरा वाराणस्यां[140] गत्वा ऽथ उज्जयिन्यां[141] गत्वा मृताः ते परमपदं प्राप्नुवन्ति । दिव्यान्तराणि तीर्थान्तराणि मा कथयेत्यर्थः ॥ १५८

गंग०—यो गङ्गां गत्वा मृतः, यश्च शिवतीर्थं गत्वा मृतः, स त्रिदशावासं देवलोकं गतः सन् क्रीडति। किं कृत्वा, यमलोकं मरणं जित्वा इत्यर्थः ॥ १५९

हत्थि मा०—हस्ती मारयिता, लोकः कथयिता, पटहो वादिता, शुनको भषिता, इत्यर्थः ॥ १६०

रवि अ०—रव्यस्तमने समाकुलेन चक्रेण चक्रवाकेन कण्ठे वितीर्णं दत्तं मृणालिकायाः[142] खण्डं न छिन्नं न खण्डितम्। नउ उत्प्रेक्ष्यते—जीवार्गला दत्तेत्यर्थः ॥ १६१

वलया०—नायिका वलयावलिनिपतनभयेन ऊर्ध्वभुजा याति। नाइ उत्प्रेक्ष्यते—वल्लभविरहमहाद्रहस्य(=०ह्रदस्य)स्ताघं गवेषयतीत्यर्थः ॥ १६२

पेक्खेवि०—नावइ उत्प्रेक्षते गुरुमत्सरभृतं लवणं ज्वलने प्रविशति। किं कृत्वा। जिनवरस्य दीर्घ[143]नयनं सलवणं सलावण्यं मुखं प्रेक्ष्येत्यर्थः ॥ १६३

चंपय०—हे सखि, चम्पककुसुमस्य मध्ये भ्रमरः प्रविष्टः। जणि उत्प्रेक्ष्यते—कनके उपविष्टमिन्द्रनीलं रत्नं शोभते इत्यर्थः ॥ १६४

अब्भा ल०—पर्वतेषु अभ्राणि मेघा लग्नानि। पथिको रटन् याति। उत्तरार्धे रुदनकारणमाह। यो मेघो गिरिगिलनमनाः[144] स ईदृक्[145] किं नायिकाया[146] धनानि इच्छति। तां न रक्षतीति भावः इत्यर्थः ॥ १६५

पाइ वि०—अन्त्रं पादे विलग्नम्। शिरः स्कन्धं प्रति ल्हसितं पतितम्। ततोऽपि हस्तः क्षुरिकायाम्। अहं कान्तस्य लोकैः बलिंक्रिये, इत्यर्थः ॥ १६६

सिरि च०—शिरसि चटिताः फलानि खादन्ति। पुनः शाखाः[147] मोटयन्ति। ततोऽपि महाद्रुमाः[148] शकुनानामपराधं न कुर्वन्ति इत्यर्थः ॥ १६७

सीसि से०—गद्यम्। कामस्य तं कुसुमदामकोदण्डं प्रणयेन स्नेहेन नमत। तत् किं—यद् धनुः रत्या कामभार्यया क्षणं शीर्षे शेखरो निर्मापितः, यत् क्षणं कण्ठे प्रालम्बः कृतः, यत् क्षणं मुण्डमालिकायां मस्तके विहितम् ॥ १६८

॥ इति प्राकृतदोहकाः ॥

---

140 MS वाणारस्यां　141 MS उज्जिन्यां　142 MS मृणालकाया
143 MS दीर्घ　144 MS गिरिगलन०　145 MS ईदृग्
146 MS नायकाया　147 MS शाखा　148 MS म'हा०

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

# शब्दसूचिः


अइ (अति) ४२५–१
अइतुंगत्तण (अतितुङ्गत्वम्) ३९०
अइमत्तहं (अतिमत्तानाम्) ३४५
अइरत्तिए (अतिरक्तया) ४३८–२
अइसो (ईदृशः) ४०३
अंगु (अङ्गम्) ३३२–२
अंगहिं (अङ्गैः) ३३२–२
अंगिहिं (अङ्गेषु) ३५७–२
अंगुलिउ (अङ्गुल्यः) ३३३
अंतरु (अन्तरम्) ४०६–३, ४०७, ४०८
अंत्रडी (अन्त्र) ४४५–२
अंधारइ (अन्धकारे) ३४९–१
अंबणु (अम्लत्वम्) ३७६–२
अंसुजले (अश्रुजलेन) ४१४–३
अंसूसासेहिं (अश्रूच्छ्वासैः) ४३१–१
अकिआ (अकृतम्) ३९६–४
अक्खणहं (आख्यानाय, आख्यातुम्) ३५०–१
अक्खिहिं (अक्ष्णि) ३५७–२
अखइ (अक्षये) ४१४–२
अगलिअ-नेह-निवट्टाहं (अगलित-स्नेह-निर्वृत्तानां) ३३२–१
अग्गइ (अग्रे) ३९१–१, ४२२–११
अग्गलउ (अग्र+ल; =अधिकम्) ३४१–२
°अग्गलु (अर्गलः) ४४४–१
अग्गिएं, अग्गिण (अग्निना) ३४३–१, २
अग्गिट्ठउ (अग्निष्ठः) ४२९–१
अग्घइ (अर्हति) ३८५–१
अचिंतिय (अचिन्तिता) ४२३–१
अच्छइ (अस्ति) ३८८
अच्छउ (आस्ताम्) ४०६–३
अज्ज-वि (अद्य+अपि) ४२३–३
अज्जु (अद्य) ३४३–२
अडोहिउ (अक्षोभितम्, अकलुषितम्) ४३९–३
अणुणेइ (अनुनयति) ४१४–४
अणुत्तर (अनुत्तराम्) ३७२–१
अणुदिअहु (अनुदिवसम्) ४२८
अणुरत्ताउ (अनुरक्ताः) ४२२–९
अणुहरइ (अनुहरति) ३६७–३, ४१८–६
अण्ण see अन्न
अत्थिहिं (अस्त्रैः) ३५८–१
अत्थमणि (अस्तमने) ४४४–१
अद्धा (अर्धानि) ३५२
अधिन्नइं (अधीनानि) ४२७–१
अनउ (अनयः) ४००–१
अनु (अन्यथा) ४१५–१
अन्न (अण्ण) (अन्य) ३३७, ३५०–१, ३५७–२, ३७२–१, ३८३–३, ४०१–२, ४१४–१, ४१८–६, ४२२–१, ८, ४२५–१, ४२७–१
अन्नह (अन्यथा) ४१५
अन्नाइस (अन्यादृश) ४१३
अपूरइ (अपूर्णे) ४२२–१४
अप्पा, अप्प (आत्मा, आत्म-) ३४६, ४२२–३
अप्पण– (आत्मीय) ३३७, ३३८, ३५०–२, ४१६–१
अप्पण-छंदउ (आत्मच्छन्दकम्) ४२२–१२


Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्पाणु (आत्मानम्) ३९६-२
अप्पिअ (अप्रिय) ३६५-१
अब्भ (अभ्र) ४३९-१, ४४५-१
अब्भडवंचिउ (अनुव्रज्य) ३९५-३
अब्भत्थणि (अभ्यर्थने) ३८४-१
अब्भिडइ (संगच्छते) ३८३-३
अब्भुद्धरणु (अभ्युद्धरणम्) ३६४
अभग्गु (अभग्नम्) ३८७-३
अभउ (अभयम्) ४४०
अम्मि, अम्मडि (अम्ब) ३९५-५, ३९६-२, ४२४
अम्हइं (अस्मद्) ३७१, ३७६, ३७९-२, ३८०, ३८१, ४२२-९, ४३९-१
अम्हारा (अस्मदीयः) ३४५
अरि (अरे) ४१८-५
अलहंतिअहे (अलभमानायाः) ३५०-१
अलि-उलइं (अलिकुलानि) ३५३
अवगुणु (अवगुणः) ३९५-६
अवड-यडि (अवटतटे) ३३९
अवरेण (अपरेण) ३९५-६
अवराइस (अन्यादृश) ४१३
अवराहिउ (अपराधितम्) ४४५-३
अवरोप्परु (परस्परम्) ४०९
अवसु अवसें (अवश्यम्) ३७६-२, ४२७-१
अवसर (अवसर) ३५८-२
असड्ढलु (असाधारणः) ४२२-७
असइहिं (असतीभिः) ३९६-१
असणु (अशनम्) ३४१-२
असरु (असारः) ३९५-७
असुलहु (असुलभ) ३५३
असेसु (अशेषम्) ४४०
अह (अथ) ३३९, ३४१-३, ३६५-३, ३६७-४, ३७९-२, ४१६-१, ४४२-१
अहरु (अधरः) ३३२-२, ३९०
अहवइ (अथवा) ४१९-२
अहवा (अथवा) ४१९-२
अहो (अधः) ३६७-१
आइउ (आयातः) ४३२
आगदो (आगतः) ३५५, ३७२-१, ३७३-१, ३८०-१
आणिअइ (आनीयते) ४१९-२
आणंद (आनन्द) ४०१-३
आदन्नहं (आर्तानाम्) ४२२-१६
आयइं (इमानि) ३६५-१
आयहिं (अस्मिन्) ३८३-३
आयहो (अस्य) ३६५-३
आयरु (आदरः) ३४१-२
आलु (अलीकम्) ३७९-१
आलवणु (आलपनम्) ४२२-१६
आवइ (आयाति) ३६७-१, ४००
आवहि (आयासि, आगच्छसि) ४२२-१
आवइ (आपद्) ४००
आवट्टइ (आवर्तते) ४१९-४
आवलि (आवलिः) ४४४-२
आवास (आवास) ४४२-२
आवासिउ (आवासितः) ३५७-२
आस (आशा) ३८३-१
इ (अपि) ३८३-२, ३८४-१, ३९०, ३९६-४, ४०१-१, ४३९-३
इक्कइ (एकामपि) ३८३-२
इदनीलु (इन्द्रनीलः) ४४४-४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| इच्छहु | ( इच्छथ ) | ३८४–१ |
| इट्ठु | ( इष्टम् ) | ३५८–२ |
| इत्तउं | ( इयत् ) | ३९१–२ |
| इमु | ( इदम् ) | ३६१ |
| इअरु | ( इतरः ) | ४०६–३ |
| इह | ( इह ) | ४१९–१ |
| उअ | ( पश्य ) | ३९६–५ |
| उअही | ( उदधिः ) | ३६५–२ |
| उच्छंगि | ( उत्सङ्गे ) | ३३६–१ |
| उज्जाणवणेहिं | ( उद्यानवनैः ) | ४२२–१० |
| उज्जुअ | ( ऋजुक ) | ४१२–१ |
| उज्जेणिहिं | ( उज्जयिन्याम् ) | ४४२–१ |
| उट्ठबईस | ( उत्थानोपवेशनम् ) | ४२३–४ |
| उट्ठब्भइ | ( उत्तभ्यते ) | ३६५–३ |
| उट्ठिअउ | ( उत्थितः ) | ४१५ |
| उड्डावंतिअए | ( उड्डापयन्त्या ) | ३५२ |
| उण्हत्तणु | ( उष्णत्वम् ) | ३४३–१ |
| उत्तरइ | ( उत्तरति ) | ३३९ |
| उद्धब्भुअ | ( ऊर्ध्वभुजा ) | ४४४–२ |
| उप्पत्तिं | ( उत्पत्तिम् ) | ३७२–१ |
| उम्मिल्लइ | ( उन्मीलति ) | ३५४–१ |
| उल्हवइ | ( निर्वापयति ) | ४१६–१ |
| उवमिअइ | ( उपमीयते ) | ४१८–२ |
| उव्वत्ता | ( उद्वृत्तौ ) | ४१४–३ |
| उव्वरिअ | ( उर्वरिता ) | ३७९–१ |
| उव्वारिज्जइ | ( उद्वार्यते ) | ४३८–१ |
| °ऊसास | ( उच्छ्वास ) | ४३१–१ |
| एइ | ( एतान् ) | ४१४–४ |
| एह | ( एषा ) | ३३०–४, ३६२, ३६३, ४१९, ४२५–१ |
| एहा | ( ईदृश् ) | ४४५–१ |
| एहु, एउ | ( एतद् ) | ३९५–४, ३९९–१, ४२२–११, ४३८–१ |

| | | |
|---|---|---|
| एहो | ( एषः ) | ३९१–२, ४०२ |
| एक | ( एका ) | ४१९–४, ४२२–१२ |
| एकहिं | ( एकस्मिन् ) | ३३१, ३५७–२ |
| ,, | ( एकस्याम् ) | ४२२–८ |
| एक्कु | ( एकम् ) | ४२२–१, ४ |
| एक्कखणेण | ( एकक्षणेन ) | ३७१ |
| एकमेकउं | ( एकैकम् ) | ४२२–६ |
| एक्कसि | ( एकशः ) | ४२८ |
| एच्छण | ( एष्टुम् ) | ३५३ |
| एत्तहे | ( इतः, अत्र ) | ४१९–४, ४३६ |
| एत्तिउ | ( एतावद्, इयत् ) | ३४१–२ |
| एत्तुलो | ( इयान् ) | ४०८, ४३५ |
| एत्थु | ( अत्र ) | ३३०–४, ३८७–२, ४०४–१ |
| एवड्डु | ( इयत् ) | ४०८ |
| एम्व | ( एवम् ) | ३७६–१, ४१८–१ |
| एम्वइ | ( एवमेव ) | ३३२–२, ४२१–१, ४२३–२, ४४१–१ |
| एम्वहिं | ( इदानीम् | ३८७–३, ४२०–२ |
| ओ | ( ओ ) | ४०१–२ |
| ओइ | ( अमूनि ) | ३६४ |
| ओहट्टइ | ( अपहीयते ) | ४१९–४ |
| कइ | ( कति ) | ३७६–१, ४२०–१ |
| कइअह | ( कदा अपि ) | ४२२–१ |
| कइं | ( किम् ) | ४२६–१ |
| कइसो | ( कीदृशः | ४०३ |
| कउ | ( कुतः ) | ४१६–१, ४१८–१ |
| कंगुहे | ( कङ्गोः ) | ३६७–३ |
| कंचण-कंति-पयासु | (काञ्चनकान्तिप्रकाशः | ३९६–५ |
| कंचुआ | ( कञ्चुकम् ) | ४३१–१ |
| कंठि | ( कण्ठे ) | ४२०–३, ४४४–१, ४४६ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

कंतु (कान्तः, कान्तम्) ३४५, ३५१, ३५७–१, ३५८–१, ३६४, ३८३–३, ४१८–२
कंतस्सु (कान्ताय) ४४५–२
कंतहो (कान्तस्य, कान्ताय) ३७९–१, ३८९–१, ३९५–५, ४१६–१
कंति (कान्ति) ३४९–२, ३९६–५
कच्चु, काच्च (कच्चित्) ३२९
कज्जु (कार्यम्) ३४३–२
कज्जें (कार्येण) ३६७–३
कज्ज–गइ (कार्यगतिः) ४०६–३
कटरि (आश्चर्यम्) ३५०–१
कटारइ (कटारिकायाम्) ४४५–२
कडु (कटु) ३३६–१
कड्ढउं (कर्षामि) ३८५–१
कढणु (क्वथनम्) ४३८–२
कणिअ (कणिका) ४१९–४
कणिआरु (कर्णिकारः) ३९६–५
कधिदु (कथितं) ३९६–३
कन्नडइ (कर्णे) ४३२–१
कण्णहिं (कर्णयोः) ३४०–१
कप्पिज्जइ (कृप्यते) ३५७–१
°कबरिबंध (कबरीबन्ध) ३८२
कमलइं (कमलानि) ३५३–१
कमलि (कमलेन) ३९५–१
कमलु, कम्वलु (कमलम्) ३३२–२, ३९७, ४१४–१
कय (कृत) ४२२–९
कयंबु (कदम्बः) ३८७–२
करइ (करोति) ३३८
करउ (करोमि) ३७०–२
करण (कर्तुम्) ४४१–१
करतु (कुर्वन्) ३८८
करदि (करोति) ३६०–१
करहि (कुरु) ३८५
करहिं (कुरुतः) ३८२
करहु (कुरुत) ३४६
करि (कुरु) ३८७–३
करि (कृत्वा) ३५७–३
करिएव्वउं (कर्तव्यम्) ४३८–१
करीसु (करिष्यामि) ३९६–४
करु (कुरु) ३३०–२, ३
करेइ (करोति) ३३७, ४२०–१, ४२२–१६
करेइ (कारयति) ४१४–४
करेवि (कृत्वा) ३४०–२
करंत (कुर्वन्ती) ४३१
करंतहो (कुर्वतः) ४००
करंति (कुर्वन्ति) ३७६–१, ४४५–३
कर (कर, = किरण) ३४९–१, ३९५–१, ३
कर (कर, = हस्त) ३४९–१, ३५४–१, ३८७–३, ४१८–४, ४३९–२
करग्गुल्लालिअ (कराग्रोल्लालितम्) ४२२–१३
करवाल (करवाल) ३५४–१, ३७९–१, ३८७–३
करालिअउ (करालितकः) ४१५–१, ४२९–१
कराविआ (कारिताः) ४२३–४
करिगंडाइं (करिगण्डान्) ३५३–१
कलंकिअ (कलङ्कित) ४२८–१
कलहिअउ (कलहायितः) ४२४–१
°कलावु (°कलापः) ४१४–१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| कलिहि | (कलौ) | ३४१-३ |
| कलिजुगि | (कलियुगे) | ३३८ |
| कलेवरहो | (कलेवरस्य) | ३६५-३ |
| कवण | (का) | ३५०-२ |
| कवणहिं | (कस्मिन्) | ४२५-१ |
| कवणु | (कः) | ३९५-६ |
| कवणेण | (केन) | ३६७-३ |
| कवल | (कवल) | ३८७-१ |
| कम्वलु | (कमलम्) | ३९७ |
| कवालु | (कपालम्) | ३८७-३ |
| कवि | (काऽपि) | ३७७-१, ४२०-३ |
| कवोलि | (कपोले) | ३९५-२ |
| कसवट्टइ | (कषपट्टके) | ३३०-१ |
| कसरेहिं | (=गलिवृषभैः) | ४२१-१ |
| कसरक्केहिं | (='कसरक' इति शब्दं कृत्वा) | ४२३-२ |
| कसायवलु | (कषायबलम्) | ४४० |
| कस्सु | (कस्य) | ४२२-६ |
| कहि | (कथय) | ४२२-१२ |
| कहवि | (कथमपि) | ३७०-१ |
| कहंतिहु | (कुतः) | ४१५-१ |
| कहां | (कस्मात्) | ३५५ |
| कहिं | (कुत्र) | ३५७-३, ४२२-७ |
| कहिंचि | (कुत्र अपि) | ४२२-५, ४३६-१ |
| कइं | (किम्) | ३८३-२ |
| काइं | (किम्) | ३४९-१, ३५७-३, ३६७-१, ३७०-२, ४१८-३, ४२१-१, ४२२-२, ४२८-१, ४३४-१ |
| कामहो | (कामस्य) | ४४६-१ |
| °काय | (°काय) | ३५०-१ |
| कायर | (कातर) | ३७६-१ |
| कालि | (काले) | ४१५-१, ४२२-१४, ४२४ |
| कालक्खेवें | (कालक्षेपेन) | ३५७-३ |
| कावालिअ | (कापालिक) | ३८७-३ |
| कावि | (कामपि) | ३९५-१ |
| किअउ | (कृतः) | ४२९-१ |
| किअउं | (कृतम्) | ३७१-१ |
| कि | (किम्) | ३४०-२ |
| किं | (किम्) | ३६५-२, ४२२-९, ४३४-१, ४३९-१, ४४५-१ |
| किंपि | (किमपि) | ३९१, ४१८-६, ४३८-१ |
| कित्ति | (कीर्तिः) | ३३५ |
| कित्तिउ | (कियद्) | ३८३-१ |
| किदु | (कृतः) | ४४६ |
| किध | (कथम्) | ४०१-१ |
| किन्नओ | (क्लन्नकः) | ३२९ |
| किर | (किल) | ४१९-१ |
| किलिन्नओ | (क्लन्नकः) | ३२९ |
| किवणु | (कृपणः) | ४१९-१ |
| किम्व | (कथम्) | ४०१-२, ४२२-१२ |
| किह | (कथम्) | ४०१-३ |
| किहे | (कस्मात्) | ३५६ |
| कीलदि | (क्रीडति) | ४४२-२ |
| °कुट्टणु | (°कुट्टनम्) | ४३८-२ |
| कुंजर | (कुञ्जर) | ३८७-१ |
| कुंजरु | (कुञ्जरः) | ४२२-८ |
| कुंभइं | (कुम्भान्) | ३४५ |
| कुंभयडि | (कुम्भतटे) | ४०६-१ |
| कुडुंबउं | (कुटुम्बकम्) | ४२२-१२ |
| कुडुल्ली | (कुटी) | ४२२-१२ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुडीरइ ( कुटीरके ) ३६४
कुड्डु ( कौतुकम् ) ३९६–४
कुड्डेण ( कौतुकेन ) ४२२–८
कुमारी ( कुमारी ) ३६२
कुरल ( कुरलाः ) ३८२
कुलु ( कुलम् ) ३६१
कुसुम–दाम–कोदंडु (कुसुमदामकोदण्डम्) ४४६
कुसुमहो ( कुसुमस्य ) ४४४–४
कृदंतहो ( कृतान्तस्य ) ३७०–४
केत्तुलो ( कियान् ) ४०८, ४३५
केत्थु ( कुत्र ) ४०५–१
केम ( कथम् ) ४०१–१
केरउ ( सम्बन्धी ) ३५९
केरउं ( सम्बन्धि ) ३७३
केरएं ( सम्बन्धिना ) ४२२–१५
केवडु ( कियत् ) ४०८
केम्ब ( कथम् ) ३४३–१, ४१८–१
केम्वइ ( कथमपि ) ३९०, ३९६–४
केवि ( केऽपि, कान् अपि ) ४१२–१, ३८७–२
केसहिं ( केशैः ) ३७०–३
केस-कलावु ( केशकलापः ) ४१४–१
केसरि (केसरी) ३३५, ४२२–१५
केहउ (कीदृक्) ४०२
केहिं (अर्थे) ४२५–१
को (कः) ३९६–२, ४२२–५, ४३८–३, ४३९–३, ४४१–२
कोइ (कं अपि) ३८४
कोंतु (कुन्तम्) ४२२–१३
कोट्टरइं (कोटराणि) ४२२–२
°कोदंडु (कोदण्डम्) ४४६
को वि (कोऽपि, किमपि) ४१५, ४२२–४
°क्खेव (°क्षेप) ३५७–३
खंडइ (खण्डयति) ३६७–१, ४२८
खंडइं (खण्डे) ३४०–२
खंडिउ (खण्डितः) ४१८–२
°खंडी (खण्डिता) ४२३–४
खंडु (खण्डः) ४४४–१
खंति (क्षान्तिम्) ३७२–१
खंति (खादन्ति) ४४५–३
खंधस्सु (स्कन्धे) ४४५–२
°खंभि (स्कम्भे) ३९९
खग्ग (खड्गाः) ३३०–४
खग्गिण (खड्गेन) ३५७–१
खग्गु खड्गः) ३५७–१
खग्ग–विसाहिउ (खड्गविसाधितम्) ३८६–१
खज्जइ ( खाद्यते ) ४२३–२
खणु (क्षणम्) ४४६
खणेण ( क्षणेन ) ३७१, ४१९–१
खयगालि ( क्षयकाले ) ३७७–१
खरपत्थरि ( खरप्रस्तरे ) ३४४–१
खल ( खलः ) ४१८–५, ४२२–१
खल ( खलाः ) ४०६–२
खलाइं ( खलानि ) ३३४–१
खलु ( खलः ) ३३७
खलवयणाइं ( खलवचनानि ) ३४०–१
खल्लिहडउं ( खल्वाटम् ) ३८९–१
खसप्फसिहूअउ (=व्याकुलीभूतः) ४२२–१३
खाइ ( खादति ) ४१९–१
खाहि ( खाद ) ४२२–४
खुड्डुकइ ( = शल्यायते ) ३९५–४
खेड्डयं ( = क्रीडा ) ४२२–९
खेल्लंति ( = क्रीडन्ति ) ३८२


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| खोडि | (=दोष:) | ४१९ |
| °गइ | (गति:) | ४०६–३ |
| गइअ | (गता) | ३६७–४ |
| गउरी | (गौरी) | ३२९ |
| गंग | (गङ्गाम्) | ४४२–२ |
| गंगा–ण्हाणु | (गङ्गास्नानम्) | ३९९–१ |
| गंजिउ | (=पराजित:) | ४०९ |
| °गंठि | (=°ग्रन्थि:) | ४२०–३ |
| °गंडाइं | (=°गण्डान्) | ३५३ |
| गंड-त्थलि | (गण्डस्थले) | ३५७–२ |
| गज्जहि | (गर्जसि | ३६७–४ |
| गज्जु | (गर्ज) | ४१८–५ |
| गणइ | (गणयति) | ३५८–२ |
| गणंति | (गणयन्ति) | ३५३ |
| मणंतिए | (गणयन्त्या:) | ३३३, ४१४–२ |
| °गदो | (°गत:) | ३७९ |
| गमिहि | (गमिष्यति) | ३३०–२ |
| गमेप्पि, गमेप्पिणु | (गत्वा) | ४४२–२ |
| गंपि, गंप्पिणु | (गंप्पिणु) | ४४२–१ |
| गउ | (गतम्, गत:) | ४२६–१, ४४२–२ |
| गय | (गतानि) | ३५२ |
| गयउ | (गत:) | ४४२–१५ |
| °गयहिं | (गतयो:) | ३७०–३ |
| गया | (गता:) | ३७६–२ |
| गय | (गजा:, गजानाम्, गजान्) | ३३५, ३४५, ४१८–२ |
| गय–घड | (गजघटा:) | ३९५–५ |
| गयणि | (गगने) | ३९५–४ |
| गयण–यलु | (गगनतलम्) | ३७६–१ |
| गय–मत्तहं | (मत्तगजानाम्) | ३८३–३ |

| | | |
|---|---|---|
| °गरु | (°करम्) | ३९६–१ |
| गलइ | (गलति) | ४१८–५ |
| गलन्ति | (गलन्ति) | ४०६–२ |
| गलि | (गले) | ४१३–४ |
| °गलिअ | (°गलित) | ३३२–१ |
| गवक्खेहिं | (गवाक्षेषु) | ४२३–३ |
| गवेसइ | (गवेषयति) | ४४४–२ |
| गह | (ग्रहा:) | ३८५–१ |
| गरुआ | (गुरुकम्) | ३४०–२ |
| गहीरिम | (गभीरिमाणम्) | ४१९–४ |
| गामहं | (ग्रामयो:) | ४०७ |
| °गालि | (°काले) | ३७७–१ |
| गिम्भो | (ग्रीष्म:) | ४१२ |
| गिम्ह | (ग्रीष्म:) | ३५७–२ |
| गिरिहे | (गिरे:) | ३४१–९ |
| गिरि-गिलण-मणु | (गिरिगिलनमना:) | ४४५–१ |
| गिरि–सिंगहु | (गिरिशृङ्गेभ्य:) | ३३७ |
| गिलि | (गिल) | ३९६–१ |
| गिलिज्जइ | (गिल्यते) | ३७०–२ |
| गुट्ठ–ट्ठिअहो | (गोष्ठस्थितस्य) | ४१६–१ |
| गुणइ | (गुणयति) | ४२२–१३ |
| गुण | (गुणान्) | ३३८ |
| गुणहिं | (गुणै:) | ३३५, ३४७ |
| गुणु | (गुण:) | ३९५–६ |
| गुण-लायण्ण-निहि | (गुणलावण्यनिधि:) | ४१४–१ |
| गुण–संपइ | (गुणसम्पदम्) | ३७२–१ |
| गुरु-मच्छर-भरिउ | (गुरुमत्सरभृत:) | ४४४–४ |
| गृण्हइ | (गृण्हाति) | ३३६–१ |
| गृण्हेप्पिणु | (गृहीत्वा) | ३९४, ४३८–१ |
| गृहंति | (गृह्णन्ति) | ३४१–२ |
| गोट्ठडा | (गोष्ठा:) | ४२३–४ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| गोरडी | (गौरी) | ३९५-४, ४२०-३, ४३१-१, ४३६ |
| गोरि | (गौरी, गौरि) | ३२९, ३८३-३ |
| गोरिअहे-गोरिहे | (गौर्याः) | ३९५-१, ४१४-३ |
| गोरी | (गौरी) | ४१८-५ |
| गोरी-मुह-निज्जिअउ | (गौरीमुखनिर्जितः) | ४०१-२ |
| गोरी-वयण-विणिज्जिअउ | (गौरीवदनविनिर्जितः) | ३९६-५ |
| गोवइ | (गोपायति) | ३३८ |
| °ग्गहण | (°ग्रहणम्) | ३९६-१ |
| घइं | (अनर्थकः निपातः) | ४२४ |
| घंघलइं | (=झकटकाः, कलहाः) | ४२२-२ |
| घडदि | (घटयति) | ४०४-१ |
| घडिअ | (घटिता) | ४१४-१ |
| घडिअउ | (घटितः) | ३३१ |
| °घड | (°घटा, घटाः) | ३५७-१, ३९५-५ |
| घडावइ | (घटयति) | ३४०-१ |
| घणा | (घनाः, = बहवः) | ४२२-१७, ४३९-१ |
| घणकुट्टणु | (घनकुट्टनम्) | ४३८-२ |
| घण-थण-हारु | (घनस्तनभारः) | ४१४-१ |
| घण-पत्तलु | (घनपत्रवान्) | ३८७-२ |
| घत्त | (घातम्) | ४१४-३ |
| घर | (गृहाणि) | ३६४ |
| घरु | (गृहम्) | ३४१-१, ३४३-२, ३५१, ३६७, ४२२-१२ |
| घरि | (गृहे) | ४२३-३, ४३६ |
| घरहिं | (गृहे) | ४२२-१३ |
| घरिणि | (गृहिणीम्) | ३७०-३ |
| घल्लइ | (क्षिपति) | ३३४, ४२२-८ |
| घल्लंति | (क्षिपन्ति) | ४२२-३ |
| घाउ | (घातम्) | ३४६ |
| घुंटेहिं | (='घुंट'शब्दैः) | ४२३-२ |
| घुडुकइ | (=गर्जति) | ३९५-४ |
| घेप्पइ | (गृह्यते) | ३४१-१ |
| घेप्पंति | (गृह्यन्ते) | ३३५ |
| घोडा | (घोटकाः) | ३३०-४, ३४४ |
| चउमुहु | (चतुर्मुखम्) | ३३१ |
| चंचलु | (चञ्चलम्) | ४१८-३ |
| °चंदिमए | (°चन्द्रिकया) | ३४९-१ |
| चंपिज्जइ | (=आक्रम्यते) | ३९५-६ |
| चंपयकुसुमहो | (चम्पककुसुमस्य) | ४४४-४ |
| चंपावण्णी | (चम्पकवर्णा) | ३३०-१ |
| चक्कें | (चक्रेण) | ४४४-१ |
| चडइ | (चटति,=आरोहति) | ४२१-१ |
| चडाहुं | (=आरोहामः) | ४३९-१ |
| चडिअउ | (चटितः,=आरूढः) | ३३१ |
| चडिआ | (=आरूढाः) | ४४५-३ |
| °चडक्क | (=प्रहारः) | ४०६-१ |
| चत्तंकुसहं | (त्यक्ताङ्कुशानाम्) | ३४५, ३८३-३ |
| चएज्ज | (त्यजेत्) | ४१८-४ |
| चएप्पिणु | (त्यक्तुम्) | ४४१-२ |
| चय | (त्यज) | ४२२-९ |
| चरि | (चर) | ३८७-१ |
| चलंतेहिं | (चलद्भ्याम्) | ४२२-१४ |
| चलेहिं | (चलाभ्याम्) | ४२२-१४ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चलण (चरणौ) ३९९-१
°चवेड (चपेटा) ४०६-१
चाउ (त्यागः) ३९६-३
चारहडि (चारभटी, =शौर्यवृत्तिः) ३९६-३
चिंतइ (चिन्तयति) ४२२-१३
चिंतंताहं (चिन्तमानानाम्) ३६२
चिंतिज्जइ (चेतयति) ३९६-२
°चिंतिय (°चिन्तिता) ४२३-१
चिट्ठदि (तिष्ठति) ३६०-१
चुंबिवि (चुम्बित्वा) ४३९-२
चुण्णीहोइसइ (चूर्णीभविष्यति) ३९५-२
चूडुल्लउ (चूडकः, =वङ्कणम्) ३९५-२
चूरु (चूर्णम्) ३३७
चेअइ (चेतयति) ३९६-२
च्चिअ (=एव) ३६५-२
°छइल्ल (°छेकाः=विदग्धाः) ४१२-१
°छंदउं (°छन्दकम्) ४२२-१२
छड्डहि (=त्यज) ३८७-३
छड्डेविणु (=त्यक्त्वा) ४२२-३
छंमुहु (षण्मुखम्) ३३१
छाया (छाया) ३७०-१
छायाबहुल्लु (छायाबहुलः) ३८७-२
छारु (क्षारः) ३६५-३
छिज्जइ (छिद्यते) ३५७-१, ४३४-१
छिण्णु (छिन्नः) ४४४-१
छुडु (=यदि) ३८५-१
छुडु (=क्षिप्रम्) ४०१-१
छेअउ (छेदकः) ३९०
जइ (यदि) ३५१, ३५६, ३६४, ३६५-६, ३६७-१,४, ३७२-१, ३७९-२, ३८४, ३९०, ३९१-१, ३९५-१, ३९६-४, ३९९-१, ४०१-४, ४०४-१, ४१८-४, ४१९-२, ४२२-८,१७, ४३८-१,३, ४३९-१,३.
जइवि (यद्यपि) ३४३-२, ४२२-५
जइसो (यादृशः) ४०३
जउ (यतः) ४१९-३
जं (यद्) ३५०-१, ३६५-२,३, ३७१, ३८८, ३९०, ३९६-१, ४०२-२, ४२६-१, ४२९-१, ४३८-२, ४४६.
जंति (यान्ति) ३८८-१
जंपि (जल्प) ४४२-१
जम्पिरहे (जल्पनशीलायाः) ३५०-१
जगि (जगति) ४०४-१
जगु (जगत्) ३४३-१
जग्गेवा (जागर्तव्यम्) ४३८-३
जज्जरिआउ (जर्जरिताः) ३३३
°जण (°जन) ३६४
जण (जनाः) ३७२-१, ३७६-१.
°जणस्सु (°जनस्य) ४१९-३
जणु (जनः, जनम्) ३३६-१, ३३९, ४०६-३, ३३७
जणेण (जनेन) ३७१
जण-सामन्नु (जनसामान्यः) ४१८-६
जणि (इव) ४४४-४
जणु (इव) ४०१-३


Jain Education International For Private & Personal Use Only www.jainelibrary.org

जत्तु (यत्र) ४०४
जमहो (यमस्य) ४१९–१
जम–घरिणी (यमगृहिणीम्) ३७०–३
जम-लोउ (यमलोकम्) ४४२–२
जम्मि (जन्मनि) ३८३–३
जम्मु (जन्म) ३९६–३, ४२२–४
जयस्सु (जगतः) ४४०
जय–सिरि (जयश्रियम्) ३७०–३
जरखंडी (जराखण्डिता) ४२३–४
जलइ (ज्वलति) ३६५–२
जलहु (जलात्) ४१५–१
जलि (जले) ३८३–१
जलि (जलेन) ३८३–२, ४१४–३
जलु (जलम्) ३९५–७, ४१९–४, ४२२–१५, ४३९–२
जले (जले) ३६५–२
जलणि (ज्वलने) ४४४–३
जलणो (ज्वलनः) ३६५–२
जसु (यस्याः, यस्य) ३६८–१, ३७०–४, ३८९–१, ४२२–१५, ४२७–१
जहिं (यत्र, यस्मिन्) ३४९–२, ३५७–१, ३८६–१, ४२२–५
जहे (यस्याः) ३५९
जा (यावत्) ३९५–६
जाइ (याति) ३५०–१, ४४१–१, ४४४–२, ४४५–१
जाइज्जइ (=गम्यते) ४१९–२
जाइट्ठिआए (=यद् यद् दृष्टं तस्मिन्) ४२२–१७
जाउ (यातु) ३३२–१, ४२०–१
जाई (जातिम्) ३६५–१
जाणइ (जानाति) ४०१–४, ४१९–१
जाणउं (जानामि) ३९१–१, ४३९–३
जाणह (जानीथ) ३६९
जाणिअइ (ज्ञायते) ३३०–४
जाणिउं (ज्ञातम्) ३७७–१, ४२३–१
जाम (यावत्) ४०६–१
जाम्व (यावत्) ३८७–२, ३९५–३
जाम्वहिं (यावत्) ४०६–३
जाउं (जातम्) ४२६–१
जाएं (जातेन) ३९५–६
जाया (जातौ) ३५०–२
°जाल (°ज्वाला) ३९५–२, ४१५–१, ४२९–१
जासु (यस्य) ३९६–३, ४२०–२
जाहि (यासि) ४३९–३
जाहुं (यामः) ३८६–१
जि (एव) ३४१–३, ४१४–१, ४१९–२, ४२०–१, ४२२–१२, ४२३–३, ४२९–१
जिणवरहो (जिनवरस्य) ४४४–३
जिणेप्पि (जित्वा) ४४२–२
जिब्भिंदउ (जिह्वेन्द्रियम्) ४२७–१
जिम्व (यथा) ३३०–३, ३४४–१, ३४७–१, ३५४–२, ३६७–३, ३७६–२, ३९५–१, ३९६–४, ३९७, ४२२–२
जिम्व (इव) ३३६–१, ३८५–१, ४२२–१७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| जिह | ( यथा ) | ३३७, ३७७-१ |
| जीउ | ( जीवम् ) | ४३९-२ |
| जीवइ | ( जीवति ) | ३६७-४ |
| जीवहं | ( जीवानाम् ) | ४०६-३ |
| जीवग्गलु | ( जीवार्गलः ) | ४४४-१ |
| जीविउ | ( जीवितम् ) | ३५८-२, ४१८-३ |
| जु | ( यः, यद् ) | ३४५, ३५०-१, ३६०, ३६७-१, ४१८-२ |
| °जुअलु | ( युगलम् ) | ४१४-१ |
| जुअंजुअ | ( =पृथक्पृथक् ) | ४२२-१ |
